त्रिविक्रमस्तोत्रम्

विदारितारिसङ्घातं पादाक्रान्तजगत्त्रयम् ।
गदाचक्रधरं धीरं सदा वन्दे त्रिविक्रमम् ॥ १॥

शङ्खाम्भोजकरद्वन्द्व हुङ्कारार्दितदानव ।
शङ्कातङ्कहराहं ते किङ्करोऽस्मि त्रिविक्रम ॥ २॥

क्षपाकरोल्लसद्वक्त्रं कृपाविपुललोचनम् ।
अपारसुगुणस्तोममुपासे तं त्रिविक्रमम् ॥ ३॥

रमाधराश्लिष्टपार्श्वं समस्तसुरसेवितम् ।
भ्रमादिदोषदूरं तं नमामि श्रीत्रिविक्रमम् ॥ ४॥

योऽङ्गादङ्गजमस्राक्षीद्गङ्गामङ्गुष्ठतोऽसृजत् ।
तुङ्गामरचयोत्तुङ्गं तं गायामि त्रिविक्रमम् ॥ ५॥

नानालङ्कारभरितं पीनावयवमोहनम् ।
ज्ञानानन्दमयं वन्दे श्रीनाथं तं त्रिविक्रमम् ॥ ६॥

वृन्दारकेन्द्रवन्द्यांघ्रिं नन्दितीर्थमुनेः प्रियम् ।
कन्दर्पकोटिलावण्यं तं ध्यायामि त्रिविक्रमम् ॥ ७॥

सुधाकुन्देन्दुधवलमधःकृतचराचरम् ।
उदारमादराद्वन्दे त्रिधामानं त्रिविक्रमम् ॥ ८॥

वेदान्तवेदितगुणं बोधप्रदमहर्निशम् ।

आधारं नौमि जगतां श्रीधामानं त्रिविक्रमम् ॥ ९ ॥

अनुयागेन बलिना मनुना मननेन च ।
दिनेदिनेऽर्चितं वन्दे मनसा तं त्रिविक्रमम् ॥ १० ॥

सर्पिःपायसनैवेद्यैर्भक्ष्यैश्च विविधैः सदा ।
नृत्यवादित्रगीतैश्च तर्पयामि त्रिविक्रमम् ॥ ११ ॥

वादिराजेन्द्रवरदं सोदापुरनिवासिनम् ।
मोदप्रदं सदा वन्दे माधवं तं त्रिविक्रमम् ॥ १२ ॥

धूपैर्गन्धानुलेपैश्च दीपैरपि मनःप्रियैः ।
तापसैः पूजितं वन्दे श्रीपतिं तं त्रिविक्रमम् ॥ १३ ॥

योऽसौ धवलगङ्गायाः पार्श्वे तिष्ठति सर्वदा ।
देशेदेशे च विख्यातमासेवे तं त्रिविक्रमम् ॥ १४ ॥

अग्रे निधाय श्रीदेवीं पृष्ठे पार्श्वे च सज्जनान् ।
स्वर्गिभिः परितः सेव्यो मध्ये भाति त्रिविक्रमः ॥ १५ ॥

शिलामयै रम्यतमशालावलभिमण्डपैः ।
कलशैश्चोल्लसद्देवालये भाति त्रिविक्रमः ॥ १६ ॥

यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी ।
तावत्त्रिविक्रमः सोऽयं पूज्यस्तिष्ठतु सज्जनैः ॥ १७ ॥

इदं स्तोत्रं वादिराजो मुदे सज्जनसन्ततेः ।
व्यधत्त तेन प्रीतोऽस्तु सदा श्रीदस्त्रिविक्रमः ॥ १८ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

त्रिविक्रमस्तोत्रम् समाप्तम्

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु